Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. 662 - घ

Title घटकर्परम् सटीकम्

Author

Extent 12 Age १८८६

Subject काव्यम् संम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ७७२-घ

घटकर्परम् सटीकम्

१२ पत्र

नं० ७७२-घ

पत्राणि १२ (संपूर्णम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६६२ग
घटखर्परटीका
सम्पूर्ण
प० १२ विनायक
लि. सं. १९८६

घटखर्परकाव्यसटीकप·१४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥श्रीगणपतये नमः॥ यस्याः पतिर्दुर्गान्तरं गतस्तां नायिकां पंचभिः श्लोकैरभिधत्ते। निश्चिते
त्वादि। हे कुंदसमानदंति। नीरदैः उपेत्य स्वं निश्चितं। कुंदानां पुष्पाणि। कुंदानि तैः समानाः दंता
स्तांबूलाभावाद्विरहिण्याः। आगत्य गगने व्याप्ते। सरसैर्मेघैः। खमिव ततं वनायकः सरसस्त्वाम
भ्यासे प्राप्स्यतीति भावः। भर्तृहीनानां हृदयपलत्तणा पृथ्वी तद्वदैः। रदविलेखने। विदारकैर्मे

॥निश्चितत्वमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः॥ सलिलैर्निहितं र
जः क्षितौ रविचंद्रावपि नोपलक्षितौ॥ १॥ १॥ ॥

घैः। किंच। सलिलैर्जलैः क्षितौ रजः निहितं स्थापितं। क्षितेः रजस्स्पर्शः। रजसः पूर्वं विस्तृतत्
त्वादिदानीं तस्यापनेतुं खमागमिष्यतीति ध्वनितं। किंच रविचंद्रौ न दृष्टौ जनैरिति शेषः। अपि
नातेजसि लबोधः। मेघैराच्छादितत्वान्नभस्तयोश्चाछन्नेन सर्वं पापपिकयोस्तयोरपि निज

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्रेयसीसमाश्वासनाय। आगमनं प्रतीयते। तद्वत्तवाश्वासनाय सोप्यागमिष्यति शीघ्रं चिरप्रोषि-
क इति ध्वनिः। तयोश्चोदयास्तास्तानेरतासक्तकामिनोरात्रिंदिनास्तानमित्यपि ध्वनिः। अ-
न्यसुरतदर्शनं स्वस्वेच्छो त्यादकमतस्तयोस्तदर्थं गमनं स्तात्वात वा विप्रतिर(?) चिरमागमि-
ष्यतीति ध्वनिः॥ वद्धिष्मेश्लेषसमे कलाइति लक्षणं द्वैतालीये छन्दः॥१॥ किंच अस्य मे-
हंसानन्दन्मेघमयाद्भवंति निश्रामुखान्यघनं च भवंति॥ नवांबुमत्ताः शिखि-
नो नदंति मेघागमे कुंदसमानदन्ति॥२॥
घागमे हंसानन्दन्मेघः [illegible] न्नू घनः तन्न याद्भवन्ति पलायंते। मानससरसि गच्छनेन तिर्यंचो
पिकोतायगच्छन्ति [illegible] लक्षयो मनुष्य इति ध्वनिः॥ अघरात्रेर्मुखानि प्रदोषा [illegible] नसचे
ज्ञाः सोपि कोताश्वासनायगतः किंच मयूराः नवजलमत्ताः हृष्टाः सन्तः शब्दायंति। न च मयूराः स

2

कोतात्राकारयंति।त्वदीयोऽप्याकारयिष्यतीति ध्वनिः।तेन ममगमनासामर्थ्यं किमाधि
क्यमिति वाच्यं।तेन यमगम्यमान इति वदंतीति ध्वनिः।इंद्रवज्रेयं।२।हे कुंद०।रात्रौ मे
घैर्व्याप्तं खं न शोभते तारारहितत्वात्।अचेतनं गगनमपि ताराभावाद्यपातपा त्वदीया

मेघाढ्ये निशि नभो वितारं निद्रामुपैति च हरिं सुखसवितारं।सं
ज्ञायुधभ्राजलदोधरसन्निभानां संरंभमावहति भूधरसन्निभानां।।३।।

पि त्वां विना न शोभते।किं च निद्रां हरिं प्राप्नोति वर्षार्तौ तच्छयनकालत्वात्।सुखसवितारं।
सुखस्य सवितारं सुखसवितारं जनपालनादिव्यासंगं विमुच्य सोऽपि लक्ष्मीसहितस्सु
खेन तथा तव तु विरतिकः।अन्यच्च मेघोऽधः असन्नजैलसवन्न दभानां गजानां क्रोधं ज २
नयति।संज्ञायुधः सधनुः भूधरसन्निभानां तेन शोभितमानां मध्ये सको पोपि स विरहः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सन्नागमिष्यतीति ध्वनिः। अतिदंतिगर्जनभ्रांत्या वा। वसंततिलके यं। ३। हे कुं द०। सतडिज्ज
लदार्पितजलं परिधीररवं परितः गंभीरशब्दं यथास्यात्तथा क्रियाविशेषणं बादरीषु प्रप
ततिबहति। यद्वा तडिद्भिस्सह विद्यमाना ये मेघास्तैरर्पितं मुक्तं जलं नगेषु दरीषु च। अनेन
जलदानां नायकत्वं व्यज्यते विद्युत्वतां नायिकात्वं च। अतस्सोपितानेवमवलोक्याग
सतडिज्जलदार्पितं नगेषु स्वनदंभोधरभीतपन्नगेषु। परिधीररवं जलं
दरीषु प्रपतत्स्फुटरूपसुंदरीषु। ६। इति प्रभसादयति संप्रति कोपितानिकां
तामुखानिरतिविग्रहा। कोपितानि। उत्कंठयंति पपिकान् जलदास्स्वनैः ते। शाकः
कोपः समुद्भवति नद्वनितास्वनैः ते। ५। ५ ५ ५ ॥
मिष्यतीति ध्वनिः। वसंतमालिके यं। कोपं दध्नि दसिकं वा। ६। हे कुं द०। संप्रति वर्षर्तौ कोपीति
जासेकवचनं। तानि रतिविग्रहकोपनत्वेन सौंदर्यातिशयशालित्वेन प्रसिद्धानि। कांतामुखा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

निमानिनीवदनानि हिमं शीघ्रं प्रसादयति प्रसन्नीकरोति अस्मिन्नवसरे तौ मानिनीकोप
मुत्पाद्यानुनयतीति यावत्। अतस्सोपि तस्य सादनार्थमागंतेति [illegible] उच्यते। कथंभूता निर
तिविग्रहकोपिता निष्ठुरते शोतिकलहेन कोपसंयाता येषां ता [illegible] किं च स्वनेनो गर्जितो मे
घाः पांथानुत्कंठयंति उत्कंठावतः कुर्वंतीत्यर्थः। तेन नायकोहिनं दृष्ट्वोत्कंठित आगं
तेति ध्वनिः। किं च तद्वनितासु अनंतः महान् शोकः विरहदुःखं समुद्भवति उत्पद्यते। अ
नेन तन्नायकस्य विरहमसहमानस्स्वागंतेति ध्वनिः। वसंततिलका॥५॥ एवं सहचर्याभ्या
सितानायिकामेघानाह॥ छादित इति। दिनकरस्य भावने दीप्तिवने दृष्टसमुदायवाचिनो
वनपदस्य समूहे लक्षणा। छादिते सति मेघैर्दिसंर्धेधति रोषः। गगनाद्वारि त्रिपततिसति ३
शोकस्य भावने उत्पादके कामे हृदि हंतुं पीडयितुं मुद्युक्ते सति देशांतरगतभर्तृकया।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

इदं वक्ष्यमाणं उद्यते उच्यते । मेघान्प्रतीति शेषः । रथोद्धता । ६ ॥ किमुवाच । हे मेघाः यूयं सर्वका
लमवलंब्य दयितगमनव्यतिरिक्तं अतिक्रम्य यत्राशेयान् प्रोषितस्तदा आगतास्थ मा मा
स्था । मध्यमपुरुषबहुवचनं । यूयमित्यध्याहार्यं । हे हताः परोपकारनिरताः भवंतोऽधुना मयि निर्द
याः इति दिनकरस्य भावनेरवाज्ज्वले पतति शोकभावने । मन्मथेऽह दिहंतु
मुद्यते प्रोषितप्रमदयेदमुद्यते । ६ । सर्वकालमवलंब्य तोयदा आगतास्थ ष्य
दयिते गते यदा । निर्दयेन परदेशं विना मारयिष्यथ हतेन मां विना ॥ ७ ॥
ऽतो न निर्दयेन निर्जलेन वा अत एव परदेशे विना विना मां मारयिष्यथ । हे इति कष्टे । अपम
थ्य उपकारस्तस्य कर्त्तव्या उपकारकारित्वात् । मारयिष्यथ न तेनेति पाठे काकुः न मारयिष्यथ किं
अपि तु मारयिष्यथ्येव ॥ इयं रथोद्धता ॥ ७ ॥ हे मुक्ता घनाः यूयमेव तं कांतं ब्रूत उपदिशत । पथि
केषु पांसुलं पांसुलंदोषान् लाति अंगीकरोतीति पांसुलः मलिनः अधमः इति यावत् । तं पांथा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५ धममित्यर्थः। एता हंसां प्रति उपदेशमाव बकः। अस्मास्वेव बद्धक्तः सार्धनादरः किमि
तिचेत्। किंभूता यूयं पक्षिशीघ्रलंघनाः। लंघनं गमनं येषां ते। अन्यस्य स्थिरतया गम
नकालविलंबेन भवतः श्रमो नुचितत्वाद्युक्तः सार्धनादरः। तत्र गत्वा किं वक्तव्यमि
ब्रूत तं पक्षिकपोशुक्लं घना यूयमेव पक्षिशीघ्रलंघनाः। अन्यदेशरति
रयमुच्यतां साध्यवातव वधूः किमुच्यतां ॥८॥ ८॥ ॥
तिचेत्तत्राह। भो पक्षिकं अयं यं वर्षतौ अन्यदेशादीति मुच्यतां तस्मात् शीघ्रं स्वदेशं गंत
व्यमित्यर्थः। अस्य वातव वधूः अस्माभिः किमुच्यतां वक्तुं न शक्यते इत्यर्थः। अभिवीच्यादर
णं प्राप्नोतीति भावः। यद्वा सा किं वदतु अस्मदुक्तमेव कर्त्तव्यं। रपोद्गता ॥८॥ भो नापेति ५
संबोधनं। संप्रति वर्षर्तौ हंससमुदाया मानससरः प्रति आकाशे प्रस्थिताः। तिर्य्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चोऽपि कां ताम्श्वासनाय गच्छंतीति भावः। किंच चातकः पक्षी अपि तृषितो जलं याचते जलधारा
भिः स्वार्थिकष्यञिति ष्यंकर्मणस्ते यां याचा यं बुध्यमत्ते चातकः कांताधरामृतपानं याचते प्रियां प्रतीति शे
षः त्वं तु अधरपानार्थं प्रेरितोऽपि न गच्छसि महतीष्टं गारान्नभिज्ञानं ते सुपलास्योऽपि। किंच भो पथि
पथिक सा ते प्रिया दुःखिता च यदि सा न हि प्रियामाश्वासनीये त्वनेन मन्मथपीडया दशामीदशामा

हंसपंक्तिरपि नायसंप्रति प्रस्थिता वियति मानसं प्रति॥ चातकोऽपि
तृषितोऽम्बु याचते दुःखिता पथिक सा प्रिया च ते॥ ८॥ ९ ॥

तको मा दुःखकारणं तिर्यंचोऽपि प्रियामाश्वासयंति। मनु पित्रा अनभिज्ञाय सस्नेह त्वं दत्तं अभि
ज्ञाय निःस्नेहत्वमिति स्मर्यमाणा दुःखिता। रक्ष्यो कृता॥ ९॥ किंच भो पथिक कोमलं सुंदरं हरित
वालतृणं आभि भाति समंताच्छोभते। भूमाविति शेषः। नन्वेवं वा लतृणशब्देन नीलस्यैव बोधा
दन्यद्वैयर्थ्यं तत्राह पिनीलपदं वर्षर्तु ज्ञापनाय। अचेतनतृणकोमलत्वेन च कविनत्वेन हीनता

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तेन मार्ग मंजुलत्वं चस्तू चिते ।। किंच चातक उदकं अमलं मलहीनं विंदति । लभते चातक घनमुक्तमुद
कं मंतरीक्षत्वा ददते । अतस्तत्र भूमिसंबंधाभावात् निर्मलत्वं चातका अस्मानि च्छंति उदकं तदर्थं
वयमागताः । त्वदागमनपरीक्षिणीत्वं नगच्छसीसतोऽधमत्वं तवेति ध्वनिः । किंच अंबुदैर्मेघैर्मयू
र समुदायो निनाद्यते शब्दकुर्वितिः अर्थ्यते अस्य गर्जनेन मयूरान् नृत्यंतीति मेघानां कारणता नादे म
यूराणां मंजुलनादोत्सादकैरस्माभिरेव अर्थ्यमाणो गच्छतो चेन्मयूरनादोत्तरं दुःखितो भूत्वा यास

नीलश्यामभिमाति कोमलं वारि विंदति च चातको ऽमलम् ।।
अंबुदैः शिखिगुणो विनाद्यते कारतिर्दयितया विनाद्यते ।। १० ।।

नीति विभीविकोक्तिः । किंचाद्य कांतया विना नव कारतिः सुखं न कापीति भावः । एवं दुःखीभूत्वा तिष्ठ ५
सि चेद् दति धैर्य्यगुणस्त्वयि अरयोद्गता ।। १० ।। किंचाद्याकलापिनो नृत्यन्मयूरा मेघशब्द समुदिता

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

घनगर्जितसंतुष्टाः प्रेषितानां हृदये शोकलापिनः देशांतरगतभर्तृकाणां नायिकानां हृदयेषु संताप
कारकाः येन मयूराः । यद्वा यैः हृदि शोकं लपंति भाषंते अतस्तदवस्थां ज्ञात्वा गंतव्यं । भो पथिक ते सा किरण
नलव्याकुलाप्रियामेघागमक्षणापि दुःखेन धर्तुमशक्ता न मदनेन पीडिता । यद्वा तोयदागमेव वर्तेते
क्षणापि एनां हृदयस्थामपि मदनः पीडयति तस्माच्छीघ्रं त्वं व्रज । देवो दुर्बलघातक इति मदनस्यापि दया
मेघशब्दमुदिताः कलापिनः प्रोषिताहृदयशोकलापिनः । तोयदागमक्षणापि सा
द्यते दुर्धरेण मदनेन साद्यते ॥ किं कृपापि तव नास्ति कांतया पाण्डुगंडपतितालकां
तया । शोकसागरजले प्रपातितां त्वद्गुणस्मरणमेव पातितां ॥ १२ ॥ १२ ॥
भावः । त्वं तथा मा भवेति सामोपायः । रक्षो क्ताः ॥ भो पथिक तव कांतायां कांतयेति विवक्षातः ८
कारकाणां कारके इति वचनादधिकरणे विवक्षितमात्र तृतीया तेन कांतायामिति स्पर्धः । करुणापि
नास्ति निर्दयस्य तेदयाभावात् । हृदयेन तु गंतमेव स्यात् । यमकमंगमया कांतयेति केचित् ।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

6

कुसुमितकुटजेषु काननेषु प्रियरहितेषु समुत्सुकाननेषु । वहति च कलुषं जलेन नदीनां किमिति च मां स
मवेक्षसे नदीनां ॥ ४५

तन्ना । कवेरसामर्थ्यापत्तेः । कथंभूतया । पांडुविरहेण गंडौ नयोः पतिता इतस्ततो विस्रस्ता नाःसा
धनाभावात् केशांतायस्याः एतादृशि अभिनि विरलवस्त्र्या यां श्री वने हेतुमाह । अथ खलु गुणानां
स्मरणमपि सदयो मयि प्रीतिस्तन्दो धुना गमिष्यत्येवेति स्मरणं नारक्षति । शोकसागरजं
ले निपातितं शोक एव समुद्रस्तज्जलमिवेत्युपमानातत्सात् त्वद्विरहेण निःशेषः । समुद्रमपि
गुणेन रज्ज्वा तरति । रथोद्धता ॥ २२ ॥ पुनरपि तं मत्स्यदेशं ब्रूते सा हाहेति कोन त्वं मो किमिति कस्मात्का
रणान्न समवेक्षसे संपश्यसि । केषु समुत्सुकाननेषु वनेषु । कुसुमानि संयातानि येषां ते तादृशाः कु
टजाः वृक्षविशेषाः । कुटजो वत्सभेदे स्यादगस्त्य द्रोणयोरिति प्रकाशः येषु तानि तादृशेषु समु
त्सु । पुनः केषु समुत्सुकाननेषु वनेषु प्रियरहितेषु । कामिनीजनेष्विति शेषः । किंभूतेषु कामिनी ६
जनेषु समुत्सुकाननेषु समुत्सुकानि निजकांतेपूत्कंठितानि आननानि येषां तेषु इदमपि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्वामिप्रापेण तस्मात्कामिनीमुखस्य यथानुलंघितत्वं भवति तथा विधेयं॥ यदा प्रियेति भर्तृपदे
न संबोधनं। अत्र पद्ये पूर्वं वकुसुमिते इति सप्तम्यंतं लापयित्वा अग्रिमपदानि काननविशेष
णानि॥ किंभूतेषु काननेषु। कस्य जलस्य। कं शिरो जलमारब्यातमिसेकादरनिघंटुः। आन
नानि मुखोभिग्नाधारत्वात् स्यानानि इति यावत्। तेषु काननेषु सजलेष्वित्यर्थः। पुनः किं
भूतेषु काननेषु समुत्सुमुदाशीलायादितेषु। पुष्पाणां विकसनेन हास्यनिवेदकत्वं। पुनः किं
भूतेषु काननेषु रहितेषु वियुक्तेषु। कामिनीजनैरिति शेषः॥ अनेन वनानां जलाद्यनेकगुण
शोभितत्वात्कामिन्यादिजनराहित्यमात्रेण शोभामाभूदिति त्वदागमनेन च तदनेकीआव
शादसमस्तान्निध्येन सर्वापि शोभा संपत्स्यते इत्यवश्यमागंतव्यमिति स्फुटएवाशयोऽभिव्य
ज्यते। यदा केषु सत्सु कामिनीजनेषु काननेषु अधिकरणसप्तमीयं। समुत्सुमुदा सह वर्त्तमा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

7

नेषु सत्सु अनेन यथास्वभर्तृभिः सहिताः कामिन्यः काननादेशे क्रीडंति तथाहमपि त्वदागमनेन भ
विष्यामीति सत्वरमागंतव्यमित्याशयोपि व्यंग्यः। किंभूतेषु काननेषु। कुसुमितकुंजेषु। अने
न काननानां भोगयोग्यत्वं सूचितं। किंभूतेषु कामिनीजनेषु काननेषु केन सुखेन युक्तानि आ
ननानि येषां तेषु। मध्यमपदलोपिसमासात्। वियोगाभावात्सुखितानीत्यर्थः। यद्वा केन जलेन
युक्तान्याननानि येषां तेषु विपरीतसुरतश्रमस्वेदविंदुयुक्तानि। पावके च मयूरे च सुखे शीर्षे
जले च कं। पुनः किंभूतेषु कामिनीजनेषु प्रियरहितेषु [illegible]षु सर्वेषु सुंदरत्वात् सर्वेषां प्रि
यः कामस्तज्जो रः अग्निस्तद्रहितेषु सुखरूपेषु मदनजनिततापशांत्यर्थं कामिनीजन एव सु
खावह इत्यर्थः। यद्वा प्रियाणां भर्तॄणां रः संतापः अर्थान्मदनजन्य इत्यर्थः। तद्रहितोऽभर्तॄ ७
णां संतापशांत्यर्थं कामिनीजन एव हितः सुखकारी समर्थः। यद्वा प्रियाणां रः कामः तद्रहितो भ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हृदयेणां शरीरालिंगने सुखावह इत्यर्थः। रम्यकामे न लभ्यैः इति निघंटुः। पुनः कस्मिन् सति न
दीनां कलुषत्वमाविले व जले जले वहति सति पथा नदीभिः स्वकांतं प्रति गम्यते तथा त्वम
पि गच्छेत्तस्यारं कथाह। किंभूतानां नदीनां सर्वेषु पुरुषवशात् स्वस्वविरहात्। पुष्पिताग्रा वृत्तिः॥२३॥

मार्गेषु मेघसलिलेन विनाशितेषु कामेषु नुः स्मरति तेन विनाशितेषु।
गंभीरमेघरसितव्यथिता करोषि किं नाम सा प्रियवियोगजशोकदाहं॥२४॥

सांप्रतं काचित्सखीमाह। नंगना लोकुलानां हे सखि अहं प्रियवियोगाज्जातशोकाग्निं कदा
जह्यां त्यजेयं। केषु सत्सु जलदमुक्ततोयेन मार्गेषु पथिषु विनाशितेषु रुद्धेषु अनेन ए
तावत्कालेन गमनमनाप्यास्थितमधुना पुनर्नदीपूरेण त्वानयकाकुलत्वाच्च मार्गाणां विषम
त्वेन तद्गमनाभाववोधात्कथं शोकनाशः। तदभावे दत्तामदशा प्राप्तिरिति ध्वनिः। कस्मिन्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

४

सन्ति तेनेत्यनेन निर्द्दयत्वबोधः। भर्त्रा विना कामो धनुः स्फुटानि सज्यं कुर्वन्ति। मां लक्ष्मीक
से इति शेषः। किंभूतं धनुः। शितेषु शितैः तीक्ष्णैः इषुभिर्बाणैरन्वितं तया। किंभूता अहं गंभीरं यन्मेघ
स्वरसितं घनगर्जितं तेन व्यथिता व्यथा संजाता यस्याः सा दुःखिता त्वयेति शेषः। वसंततिलके

सुसुगंधतया वने जितानां त्वनदंमोधरवासुवीमितानां ॥ मदनस्फुर
तेन निकेतनानां प्रतिभान्त्यद्य वनाभिकेतकानां ॥ १५॥

यं। १४॥ पुनरपि सखीमिष समदनमाह। हे सखि अद्य केतकानां केतकीपुष्पाणि केतकानि
तेषां वनानि समूहाः प्रतिभान्ति शोभन्ते। संभृतिमानि वा भवन्ति। परभीडाकरणे ध्रुव
नि। कीदृशानां केतकानां सुतरां सुगंधीनि तेषां भावः सुगंधता तया अवने जितानां व्यामा
नां। वने अजितानामिति पदच्छेदः वने अजितानां सर्वैर्विलक्षणत्वात् हन्तुमपरैरपराजितानां

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पुनः किंभूतानां स्वनंतो गर्जंतो ये मेघास्तत्संबंधि वायुना वीजितानां ईषत्कंपितानां। पुनः किंभूता
नां मदनस्य स्वकृते कामार्थं निकेतकानां गृहाणामित्यर्थः। कित निवासे निकेतयंतीति निकेतना नि
मदनस्ते शरीरं प्रीतलग्नहेतुस्थित्वा परान् पीडयति। अतस्तवैवेयं कीर्त्तिः। वसंतमालिके पंक्तिः।

तत्साधु यत्त्वां सुतनुं ससर्ज प्रजापतिः कामनिवाससर्ज्ज। त्वं मंजरीभिः
प्रवरो वनानां नेत्रोत्सवश्चासि सयौवनानां॥१६॥

॥१५॥ इदानीं प्रस्तुतं तं विहाय अप्रस्तुतं तेन कं कामव्य मोहात् प्रार्थयते। भो कामनिवासकं दर्पनि
लय सर्ज शाल साले तु सर्जके। प्रजापतिर्विधाः सुतनुं त्वां ससर्ज। तत्र एवाह तत्साधु युक्तं। सुत
नुं त्वां दर्शयति। यतः कारणात् त्वं मंजरीभिर्वल्लरीभिर्वनानां प्रवरः श्रेष्ठोसि। चेत्यपरं सयौवना
नां यौवनेन युक्तानां स्त्रीपुंसां नेत्रोत्सवः। आनंदजनकत्वात्। नेत्राणामुत्सवः उत्सवः ईदृशा
नां श्रने

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्यमेवमत्पीडाजनकत्वमनुचितमितिभावः॥ यथा स्मेरस्य तवनखतो मत्पीडाजनकत्वं किं
तु कामसंगत्येतिध्वनिः। उपजातिछंदः॥ १८॥ हे नव कंदर्प अहं तुभ्यं शिरोऽवनतास्मि
कृतनमस्कारेस्मि थः॥ यद्यस्मात्कारणात्ते पदं मे आपियोज्य तव कुसुमस्त्रितैः पुष्पैर्विके
सितैस्त्वयि मुषमस्ति हता। दुःखसंगात्मनम पीडा मा अद्भुतः। अथवा नवस्य बालस्य परपीडा
जनने अविवेकिनः कंदर्पस्य कुमारस्य कस्य दुःखसंगिनो दुःखजननं संयुक्तमेवाहि कुट
जकुसुमैर्हत्वा किं उपहस्यते त्वया मामेव दुःखं दत्वा मामेवोपहससीति महदेव चित्रमि
त्याशयः। अतः सुदुःसहस्य सुतरां सोढुमशक्यत्वेतिपतितास्मि कृतनमस्कारास्मि। अ
तो मा यथा दुःखं। युक्तं विलंबितं छंदः। १७। इदानीं नायिका निर्दयं प्रार्थयते। हे नरुवर
अहं ते तुभ्यं सदा निरंतरं विनतास्मि एवं सत्यपि मे हृदयं किमिति सत्वाहं संतापं करोषि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अत्यंतकृतघ्नत्वमितिभावः। भो नीपकदंब अहं नवकुसुमनिरीक्षणे यदि त्वत्पुष्पदर्शनपदे
स्थाने सहसाऽकस्मादेव देहं विसृजेयं। यद्वा त्वत्पुष्पनिरीक्षणे स्थाने एव देहं त्यजेयमतत् अनुचि
तमितिभावः। अत्रानुक्तगाथा चेद्दूः। २८। स्वयं पुनर्विलपति यथा सखीविंदतीमसरोजंगो।
नवकदंबशिरोऽवनतास्मिते वसति यन्मदनः कुसुमस्मिते। कुटजकिं कुसुमे रूप
हस्यते निपतितास्मि सुदुःप्रसहस्मते। ७। तरुवरविनतास्मिते सदाहं हृदयं मेऽव
करोषि किं सदाहं। तव कुसुमनिरीक्षणे पदे हं विसृजेयं सहसैव नीप देहं। एवं कु
सुमैरुपशोभितांसितैर्धनमुक्तांबुलवप्रकाशितैः। मधुनस्समवेक्ष्य कोलतां
भ्रमरश्च्युवति यूथिकालतां॥ २९॥
यूथिकानां लतां चुम्बति न वै वासक्तो भवतीत्यर्थः। किं कृत्वा मधुमैः पुष्परसस्य कालतां समय

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

10

तोऽसमवेद्य ज्ञात्वाऽनेन भ्रमरोपि मधुपानसमयमिति ज्ञात्वा सक्तोमन्नाधिकापेक्षया भिन्नरस्य
र्थध्वनिः ॥ सितैः श्वेतैः पुष्पैरुपलक्षितोऽनेन भ्रमररूपप्रियपत्तुं वनादेतस्याः पुष्पच्छलाद्वा
स्यव्यंग्यो ॥ घनैर्मुक्तायेयं तुल्यवा जलकणैस्तैर्विकासितैरन्योन्यविकस्विरद्रसकोऽभ्रवर्णादिभि
तासामृतुः स फलएव हि यादिनेषु संभाषु धातु धरणजिनदुर्दिनेषु रस्तु
त्त्वं प्रियतमैः सहमानयंति मेघागमे प्रियसखीष्वसमानयंति ॥ २० ॥ २० ॥
रलंकृतोऽकांतां चुंबतीति ध्वनिः ॥ वैतालीसुंदरीच्छंदः ॥ १९ ॥ पुनरपि सखीं वदति ॥ ऋतुः अर्था
दर्षर्तुः तासां सुंदरीणां हि निश्चयेन सफलत्वसार्थक एव तासां कासां याः इत्याह ये नवर्तमाना
ये मेघास्तेषां गर्जितानि तैर्दुर्दिनेषु मेघच्छन्नवासरेषु दिनपदं घनमात्रेत्यादर्षणे के ॥ १०
प्रियतमैः कामिभिः सह रतुत्सवं मानयंति ह्रजयंति अनुभवंति ॥ किं च मेघागमे प्रियाः स्त्राः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सख्यश्चतास्तास्समानयंति आत्मतुल्याः कुर्वंति आत्मवद्भूषणादिभिर्भूषयंतीत्यर्थः। यद्वा
मानेन आदरेण सहवर्त्तंते यास्तादृशाः कुर्वंतीत्यर्थः। अभिमानिकामिनोरानयने संतोषात्
भूषणदानमुचितमिवेति भावः। अनेन प्रिया नूनं [illegible] सखीकार्यं भवत्वतः सभूषणास्त्वयासत्या।

एतन्निशम्य विरहानलपीडितायास्तस्या वचः खलु दयालुरपीडितायाः॥ स्वस्वा
रवेण कथितं जलदैरमोघैः अत्याययौ सगृहमूनदिनैरमोघैः॥२१॥ २१॥

नेयत्त्वामलंकरिष्यामीत्यर्थध्वनिः॥२०॥ एवं विलपंत्यास्तस्याः स नायकः ऊनदिनैरल्पदिवसै
र्गृहं निजमिति शेषः। अत्याययौ आजगाम। किं कृत्वा एतत्सर्वोक्तं विरहानलेन पीडितायास्त-
स्याः प्रियायाः जलदेन स्वारवेन स्वशब्देन संग्रामात्मानं प्रति कथितं। उक्तं वचस्तं देशान्निशम्य
श्रुत्वा। किंभूतायास्तस्याः अपीडितायास्तस्माद्भावितिशेषः। किंभूतः सदयालुः अनपवचने

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ननु कालकूटमागमनात्। किं भूतैरूनदिनैर्मोघैरमोघैः अतद्नागमनागमनाभ्यां मिथ्याफलैः
सार्थकैश्च। केचिदिदं पद्यं कवेर्नेति वदंति ॥२१॥ इदानीं काव्यकर्तारं त्वं काव्यरसिकनिपुणा
ता मा कलय्य प्रतिसंदर्शयितुमाह ॥ मोऽपि व्यग्रं ये न परेण द्वितीयेन कविना नतनुत्वेन
यमकैः जीयेत पराजयं प्राप्यानि द्रव्यालंकारैः। तस्मै कवये धत्तं कुंभकपालेन उदकं व

आलव्यचां तुत्वबितः करकोषवेयं भागानुरक्तेवनितासुरतैः सपे यम्यू।

जीयेय येन कविना यमकैः परेण तस्मै वहेयमुदकं घटकर्परेण ॥२२॥ २२॥

हेयं आपये यं दुष्करमपि कविष्यामि न तुलजितो वितथान करिष्यसीति चे ... माह ॥ य
दि न वहेयं न हि भावेन चिन्तामि आयेण तुरक्ता याः कान्तास्ताः सा सुरतैः ... कुर्यां किं कला
त्वषितः सन् करकोशः कुडमलोऽञ्जलिस्तेन पेयं पानीयं तोयं पञ्जलं आलं ब्यस्ट ... न्याऽपि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

जलं स्पृष्ट्वैव शपथं करोतीति भावः। यो ह्रियस्त्रियो भवति स तच्छपथं करोतीति स्वस्यातिरसिक
त्वेन तत्प्रियत्वात्तच्छपथ इत्यादरः। न च तत्र यमकोऽस्य काव्ये ज्ञानमेवेति न्यूनता वाच्या कवि
नेतु कृतत्वात्। यः कविस्तेन तु यमकादौ जेतव्योऽस्मिन्शास्त्रे तु ज्ञास्त्रज्ञैरित्यलं विस्तरेण॥२२॥
इति घटकर्परं समाप्तं॥१॥ ॥ ॥ ॥सं१८९७श्रा॰व॰८बुधे गणेशेन लिखितं॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative